| | | |
|---|---|---|
| (1) A special present. (2) Taking, receiving. | [a][1]दानविशेषे [2]लब्धौ **दायो** [3]भागार्हपित्र्यरिक्थे[b] च । | (3) Patrimony. |
| (1) A line in a manuscript consisting of about 32 syllables. | [1]लिपिसंख्यायां [2]शास्त्रे [3]द्रव्ये च **ग्रन्थ**शब्दमिच्छन्ति[c] ॥८४४॥ | (2) A code. (3) Substance. |
| (1) Gambling (2) Die. | [1]द्यूता[2]क्षसारि[3]फलकास्त्रयोऽप्या**कर्ष**संज्ञकाः । | (3) A draught-board. |
| (1) Connexion, association (2) Defeat. | [1]संसर्गा[2]भिभवा[3]क्रोशेष्व**भिषङ्गः**[d] प्रकीर्त्तितः ॥८४५॥ | (3) Reviling, imprecation. |
| (1) A son of त्वष्टृ the perpetual enemy of Indra. | [1]त्वाष्ट्रे [2]तमसि [3]शत्रौ च **वृत्र**शब्दस्त्रिषु स्मृतः । | (2) Darkness. (3) An enemy. |
| (1) Depression, sorrow (2) Sacrifice (3) Anger. | **मन्यु**[1]र्दैन्ये [2]क्रतौ [3]कोपे [1]नाडी[2]स्वर्ग[3]क्षितिष्**विडा** ॥८४६॥ | (1) An artery (2) Heaven (3) The earth. |
| | उक्तानामप्यनुक्तानां शब्दानामिह संग्रहः । | |
| (1) Pleasure (2) Wind (3) Water. | **क**शब्दः [1]सुख[2]वाय्व[3]म्बु[4]ब्रह्म[5]मस्तकवाचकः ॥८४७॥ | (4) The god Brahma. (5) Head. |
| (1) An oath. (2) understanding. (3) Cause. | **प्रत्ययाः**[e] [1]शपथ[2]ज्ञान[3]हेतु[4]विश्वास[5]निश्चयाः । | (4) Trust. (5) Certainty. |
| (1) Expansion. (2) Awning. (3) Empty. | [1]विस्तारे [2]कदके [3]शून्ये **वितानं** स्यात्[4]क्रतौ [5]क्षणे ॥८४८॥ | (4) Sacrifice. (5) Opportunity. |
| (1) A side (2) Fortnight. | [1]देहावयव[2]मासार्ध[3]पतत्र[4]गृहभित्तिषु । | (3) Wing (4) The wall of a house. |
| (5) A follower. | [5]परिग्रहे [6]समीपे च **पक्षः** षट्सु निगद्यते ॥८४९॥ | (6) Neighbourhood. |
| (1) Fire (2) Wealth (3) The rays of the sun. | [1]अग्नि[2]धन[3]रश्मि[4]रत्न[5]त्रिदशविशेषेषु भवति **वसु**शब्दः । | (4) A jewel, gem. (5) A class of gods 8 in number. |
| (1) Motion, action (2) Nature, character (3) Origin. | [1]चेष्टा[2]त्मजन्म[3]सत्ता[f]भि[4]प्राये[5]ष्वभिहितो **भावः** ॥८५०॥ | (4) Existence (5) meaning, purport. |
| (1) A measure of time equal to 4 minutes. | [1]कालविशेषे[2]ऽवसरे[3]ऽव्यापारे [4]पारतन्त्र्ये च । | (2) Opportunity. (3) Leisure. (4) Dependence. |
| (5) Middle. | [5]मध्ये तथो[6]त्सवे च **क्षण**शब्दः कथ्यते[g] सद्भिः ॥८५१॥ | (6) Festival. |
| (1) Custom. (2) Senses. | [1]आचारे [2]नयनादौ [3]द्यूतविशेषे तथा [4]रथावयवे । | (3) Playing at dice (4) An axle. |
| (5) Terminelia Balaria. | **अक्षं** [5]विभीतकेऽपि प्रयुञ्जते[h] पञ्चसु प्राज्ञाः ॥८५२॥ | |
| (1) Trouble (2) End (3) Good conduct. | **निष्ठा** [1]क्लेशे[2]ऽवसाने च [3]व्यवस्थो[4]त्कर्षयो[5]र्व्रते । | (4) Excellence. (5) A vow. |
| (1) Excellent (2) Power (3) Wealth. | [1]श्रेष्ठे [2]स्थाम्नि [3]धने [4]शुक्रे[i] [5]मज्ज्ञि **सार** उदाहृतः ॥८५३॥ | (4) Semen, virile. (5) Marrow. |

a दाने विशेषे, दाने विशेषलब्धौ b पितृऋक्थे, पितृरिक्थे c ग्रन्थमिच्छन्ति d भिष्वङ्गः e प्रत्ययः f जन्ममत्वाभिप्रायेष्व g कथ्यते कृतिभिः h प्रयुज्यते i शुक्ले, शुल्के ।